यजमानप्रमाणो वा संस्थाप्यो भूतिमिच्छता ॥’
क्षीरिवृक्षोऽश्वत्थादिः। ततो धेनुं सचेलकण्ठां कांस्याद्युक्तविशेषणयुक्तां जलाशयेऽवतारयेत्। तथा हयशीर्षपञ्चरात्रे।
‘गां सवत्सां समानीय सुशीलाञ्च पयस्विनीम्।
कांस्योपदोहां घण्टादिवस्त्रपुष्पोपशोभिताम्।
स्वर्णशृङ्गीं रौप्यखुरां ताम्रपृष्ठां सुशोभनाम्॥
लाङ्गूलन्यस्तहस्तोऽसौ यजमानः सबान्धवः।
शनैः सन्तारयित्वा तामाचार्य्याय निवेदयेत्॥’
कांस्योपदोहां कांस्यक्रोड़ामिति यावत्। कापिले।
‘अजले जलमुत्पाद्य यजमानः सभार्य्यकः।
तटेदे प्राङ्मुखो भूत्वा कृतगोलाङ्गूलाङ्गुलिः॥’
इदं सलिलं पवित्रं इतिमन्त्रेणावतार्य्यमाणामनुमन्त्रयेत्। ततः प्राङ्मुखः सन्नवतारयेत्। सा च गौः पश्चिमतोऽवतार्य्या। ततः कूलसमीपं गत्वा तर्पयेत्। यथा कापिलम्।
‘पुनः पुच्छोदकेनाथ सतिलेन कुशेन तु।
सुमनैवापसव्येन पितृतीर्थेन तर्पयेत्॥
गताश्चागमिष्यन्ति ये कुले मम बान्धवाः।
ते सर्व्वे तृप्तिमायान्तु मया दत्तजलेन वै।
ततो सुयामि मन्त्रेण सुवेशां वत्ससंयुताम्॥’
आचार्य्येणान्वारब्ध उत्तीर्य्य आपोऽस्मान्मातरः शुन्धयन्त्वितिमन्त्रेण ऐशान्यामुत्थापयेत्। सुयवसा भगवतीह भूया इति ब्रूयात्। सा यदि हिंकारं करोति तदा हिं कृण्वतीत्यादि जपेत्। तत उक्तविशेषणयुक्तां धेनुमाचार्य्याय सामगाय दद्यात्। ततो यथाशक्ति दक्षिणाञ्च दद्यात्। एतत्पर्य्यन्तं न कूपे व्यवह्रियतेऽसम्भवात्॥ *॥ तत उत्सर्गं कुर्य्यात्। अत्र विशेषमाह रत्नाकरधृतमत्स्यपुराणम्।
‘फलान्याचिन्त्य मनसा विविधानि शुभानि च।
प्रदद्यात् सर्व्वभूतेभ्यो जलपूर्णं जलाशयम्॥’
कापिलञ्च।
‘ततस्तत्पश्चिमं तीरं गत्वा पूर्व्वाननस्थितः।
जलोत्सर्गं प्रकुर्व्वीत सर्व्वसत्त्वार्थकं ध्रुवम्॥’
सर्व्वसत्त्वार्थकं सर्व्वभूतप्रयोजनकम्। सर्व्वभूतेभ्य उत्सृजेदित्यर्थः। देवपितृमानुष्याः प्रीयन्तामिति पठेदिति शेषः। उत्सृज्य यजमानो ब्राह्मणान् स्वस्ति वाचयीतेति दक्षिणाभिरिति शेषः। एतत्पर्य्यन्तं कूपेऽपि। जलाशयोत्सर्गस्य सर्व्वभूतोद्देश्यकत्वेन अपकृष्टचेतनोद्देश्यकत्वेऽपि त्यागत्वमपि। ततश्च कीटादेर्ममेदमिति स्वीकारायोग्यत्वेन वेदमेयोद्देश्यगतस्वत्वाजनकत्यागरूपत्वात् अस्य यागत्वम्। अतएव जलाशयोत्सर्गमुपक्रम्य मत्स्यपुराणेऽपि। प्राप्नोति तद्यागफलेन भूय इति यागत्वेनाभिहितम्। ततश्च तज्जलं स्वस्वत्वदूरीकरणेन नद्यादिवत् साधारणीकृतम्। अतएव
‘सामान्यं सर्व्वभूतेभ्यो मया दत्तमिदं जलम्।
रमन्तु सर्व्वभूतानि स्नानपानावगाहनैः॥’
इति मन्त्रलिङ्गेन उपादानं विना कस्यापि न स्वत्वमिति। ततश्चास्य यागवदुत्तराप्रतिपत्तेरश्रुतत्वात् साधारणजनस्य परिग्रहमात्रेण गोतमोक्तेन स्वामित्वश्रुतेर्यजमानस्यापि तथात्वेन स्वामित्वात् तत्र स्नानादावदोष इति तत्त्वम्। यथा गोतमः। स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्त्रियस्य विजितं निर्द्दिष्टं वैश्यशूद्रयोरिति। परिग्रहोऽनन्यपूर्व्वस्य जलतृणकाष्ठादेः स्वीकार इति मिताक्षरा॥ ऋक्थाधिकारे चक्रमाहापस्तम्बः। दायाद्यं शिलोञ्छौ चान्यच्चापरिगृहीतमिति। अपरिगृहीतमन्यास्वीकृतमस्वामिकमिति यावत्। निर्व्विष्टं वेतनलब्धं निर्वेशो भृतिभोगयोरित्यमरकोषत्रिकाण्डशेषयोः॥ हयशीर्षे।
‘आपोहिष्ठेति तिसृभिः पञ्चगव्यं विनिःक्षिपेत्।
तीर्थतोयं तथा पुण्यं शान्तितोयं द्विजैः कृतम्॥
गोकुलं पाययेत् पश्चात् द्विजान् वेदविदस्तथा।
ततोऽन्नं भोजयेद्विप्रान् दद्यात्तेभ्यश्च दक्षिणाम्॥
एतत्पर्य्यन्तं कूपेऽपि॥ *॥ कापिले।
‘नागानामष्ट नामानि लिखितानि पृथक् पृथक्।
ततः कुम्भे च निःक्षिप्य गायत्त्र्या च विलोड्य वै॥
उद्धरेत् पत्रिकामेकां तत्रैव नागमोक्षयेत्।
यस्य नामोद्धरेत्तत्स स वै जलाधिपः स्मृतः॥
तञ्च संपूज्य गन्धाद्यैर्दद्यात् क्षीरञ्च पायसम्॥’
पत्त्राण्याम्रस्य योगीश्वरधृतवचनाद्यथा।
‘अष्टौ नामान्याम्रपत्रे कृत्वा चैव प्रयत्नतः॥’
तानि च गारुडे।
‘अनन्तो वासुकिः पद्मो महापद्मोऽथ तक्षकः।
कुलीरः कर्कटः शङ्खो ह्यष्टौ नागाः प्रकीर्त्तिताः॥’
एतानि नामानि आम्रपत्रे लिखित्वा कलसमध्ये निःक्षिप्य गायत्त्र्या छन्दसा मथ्नामि इति रघुनाथधृतमन्त्रेणालोड्य यस्य नामोत्तिष्ठति तं यष्ट्यां समावाह्यानेन नागेनास्य जलस्य रक्षा कर्त्तव्या इति ब्राह्मणान् श्रावयेत्। हयशीर्षे।
‘वैणुकं वारुणञ्चैव पुन्नागं नागकेशरम्।
वकुलं चम्पकञ्चैव निम्बञ्चैवाथ खादिरम्॥
एतेषामेव दारूणां नागयष्टिः प्रकीर्त्तिता।
सवक्रकोटरं त्यक्त्वा तस्मात् कुर्य्याद्यथेप्सितम्॥’
तथा च बृहस्पतिः।
‘शूलचक्राङ्कितां कृत्वा स्थापयित्वा जलाशये।
द्वादशाङ्गुलमानन्तु वापीचक्रं प्रकल्पयेत्॥
षोड़शं पुष्करिण्यान्तु विंशतिञ्च सरोवरे।
सागरे हस्तमात्रन्तु लौहं ताम्रन्तु पैत्तलम्॥
चक्रञ्च विविधं प्रोक्तं कुर्य्यात्तेषां यथेप्सितम्।
शतहस्ता भवेद्वापी द्विगुणा पुष्करिण्यपि॥
त्रिगुणन्तु सरोमानमत ऊर्द्ध्वन्तु सागरः॥’
ततो द्वादशपञ्चदशविंशत्येकविंशत्यन्यतमकनिष्ठाङ्गुल्यवच्छिन्नहस्तप्रमाणां यष्टिं वक्ष्यमाणमन्त्रेण स्थापयेत्। ॐ गन्धद्वारेति गन्धवारिणा ॐ भद्रं कर्णेभिरिति तैलहरिद्रया ॐ काण्डात् काण्डादिति दूर्व्वाभिः ॐ द्रुपदादिव इत्यादिना पञ्चमृत्तिकादिभिः ॐ मधुवातेति पञ्चामृतेन याः फलिनीरिति फलोदकेन ॐ युवासुवासा इति क्षुद्रघण्टिकायुतां पताकां यष्ट्यां बध्नीयात्। ॐ यष्ट्यै नमः इतिमन्त्रेण पूजयेत्। पुष्पाद्यलङ्कृतां यष्टिं कन्दरसमीपं नयेत्। गुरुस्तु शङ्खादिनिःस्वने राजतवरुणप्रतिमां उत्तिष्ठेति समुत्थाय प्रदक्षिणत्रयं कृत्वा आपोहिष्ठा इत्यादिना मन्त्रेण वरुणस्योत्तम्भनमसि इतिमन्त्रेण च जले क्षिपेत्। ततस्तत्रैव खाते शाद्वलगोमयदधिमधुकुशमहानदीजलपञ्चरत्नानि ॐ येते-वापी रोचने दिव इतिमन्त्रेण क्षिपेत्। ॐ ध्रुवं ध्रुवेण मनसा इतिमन्त्रेण यष्टिमभिमन्त्र्य ॐ यूपव्रस्केतिमन्त्रेण जलमध्ये आरोपयेत्। ततो जलमातॄः पूजयेत्। यथा ह्रीं पूर्व्वस्याम्। श्रियं आग्नेय्याम्। शचीं दक्षिणस्याम्। मेधां नैरृत्याम्। श्रद्धां पश्चिमायाम्। विद्यां वायव्याम्। लक्ष्मीं उत्तरस्याम्। सरस्वतीं ऐशान्याम्। अधो विद्याम्। ऊर्द्ध्वं लक्ष्मीम्। पाद्यादिभिः संपूज्य अग्निं प्रदक्षिणीकृत्य सूर्य्यादिद्वात्रिंशद्देवताः पूजयेत्। क्षमस्वेति वरुणं क्षामयेत्। कापिलम्।
‘शङ्खतूर्य्यादिनिनदैस्तथा वै क्षीरधारया॥’
जलाशयं प्रवेष्टयेदिति शेषः। प्रतिष्ठानन्तरं मात्स्ये।
ततः सहस्रं विप्राणामथवाष्टशतन्तथा।
भोजयेच्च यथाशक्त्या पञ्चाशद्वाथ विंशतिम्॥”
इति जलाशयोत्सर्गतत्त्वम्॥

पुष्करी, [न्] पुं, (पुष्करमस्यास्तीति। पुष्कर+इनिः।) हस्ती। इति त्रिकाण्डशेषः॥

पुष्कलं, क्ली, (पुष्यति पुष्टिं गच्छत्यनेनेति। पुष+“कलंश्च।” उणा० ४।५। इति कलन् स च कित्।) ग्रासचतुष्टयात्मकभिक्षा। यथा,—
“भिक्षामाहुर्ग्रासमात्रमन्नं तस्माच्चतुर्गुणम्।
पुष्कलं हन्तकारन्तु तच्चतुर्गुणमुच्यते॥”
इति कौर्म्मे उपविभागे १७ अध्यायः॥
अष्टकुञ्चिपरिमाणम्। यथा, प्रायश्चित्ततत्त्वे।
“अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलम्।
पुष्कलानि च चत्वारि आढ़कः परिकीर्त्तितः॥”
(नगरविशेषः। यथा, रामायणे।७।११४।११।
“हतेषु तेषु सर्व्वेषु भरतः केकयीसुतः।
निवेशयामास तदा समृद्धे द्वे पुरोत्तमे॥
तक्षं तक्षशिलायान्तु पुष्कलं पुष्कलावते।
गन्धर्व्वदेशे रुचिरे गान्धारविषये च सः॥”)

पुष्कलः, त्रि, (पुष्कं महत्त्वं लातीति। ला+कः। यद्वा, पुष्कं पुष्टिर्महत्त्वमिति यावत् तदस्यास्तीति। पुष्क+“सिध्मादिभ्यश्च।” ५।२।९७। इति लच्।) श्रेष्ठः। इत्यमरः। ३।१।४८॥ बहुः। इति हेमचन्द्रः॥ (यथा, महाभारते।३।३।१०।
“राजानो हि महात्मानो योनिकर्म्मविशोधिताः।
उद्धरन्ति प्रजाः सर्व्वास्तप आस्थाय पुष्कलम्॥”)
उपस्थितः। इति जटाधरः॥